# Maheshvara Stutih

# મહેશ્વરસ્તુતિઃ

## Document Information

Text title : Maheshvara Stutih

File name : maheshvarastutiH.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : Lingapurana || pUrvabhAgaH | adhyAyaH 21| 291||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# મહેશ્વરસ્તુતિઃ

(સૂત ઉવાચ
બ્રહ્માણમગ્રતઃ કૃત્વા તતઃ સ ગરુડધ્વજઃ ।
અતીતૈશ્ચ ભવિષ્યૈશ્ચ વર્તમાનૈસ્તથૈવ ચ ॥ ૧॥
નામભિશ્છાન્દસૈશ્ચૈવ ઇદં સ્તોત્રમુદીરયેત્ ।)

શ્રીવિષ્ણુરુવાચ ।
નમસ્તુભ્યં ભગવતે સુવ્રતાનન્તતેજસે ॥ ૨॥

નમઃ ક્ષેત્રાધિપતયે બીજિને શૂલિને નમઃ ।
સુમેણ્ઢ્રાયાર્ચ્યમેણ્ઢ્રાય દણ્ડિને રૂક્ષરેતસે ॥ ૩॥

નમો જ્યેષ્ઠાય શ્રેષ્ઠાય પૂર્વાય પ્રથમાય ચ ।
નમો માન્યાય પૂજ્યાય સદ્યોજાતાય વૈ નમઃ ॥ ૪॥

ગહ્વરાય ઘટેશાય વ્યોમચીરામ્બરાય ચ ।
નમસ્તે હ્યસ્મદાદીનાં ભૂતાનાં પ્રભવે નમઃ ॥ ૫॥

વેદાનાં પ્રભવે ચૈવ સ્મૃતીનાં પ્રભવે નમઃ ।
પ્રભવે કર્મદાનાનાં દ્રવ્યાણાં પ્રભવે નમઃ ॥ ૬॥

નમો યોગસ્ય પ્રભવે સાઙ્ખ્યસ્ય પ્રભવે નમઃ ।
નમો ધ્રુવનિબદ્ધાનામૃષીણાં પ્રભવે નમઃ ॥ ૭॥

ઋક્ષાણાં પ્રભવે તુભ્યં ગ્રહાણાં પ્રભવે નમઃ ।
વૈદ્યુતાશનિમેઘાનાં ગર્જિતપ્રભવે નમઃ ॥ ૮॥

મહોદધીનાં પ્રભવે દ્વીપાનાં પ્રભવે નમઃ ।
અદ્રીણાં પ્રભવે ચૈવ વર્ષાણાં પ્રભવે નમઃ ॥ ૯॥

નમો નદીનાં પ્રભવે નદાનાં પ્રભવે નમઃ ।
મહૌષધીનાં પ્રભવે વૃક્ષાણાં પ્રભવે નમઃ ॥ ૧૦॥

ધર્મવૃક્ષાય ધર્માય સ્થિતીનાં પ્રભવે નમઃ ।
પ્રભવે ચ પરાર્ધસ્ય પરસ્ય પ્રભવે નમઃ ॥ ૧૧॥

નમો રસાનાં પ્રભવે રત્નાનાં પ્રભવે નમઃ ।
ક્ષણાનાં પ્રભવે ચૈવ લવાનાં પ્રભવે નમઃ ॥ ૧૨॥

અહોરાત્રાર્ધમાસાનાં માસાનાં પ્રભવે નમઃ ।
ઋતૂનાં પ્રભવે તુભ્યં સઙ્ખ્યાયાઃ પ્રભવે નમઃ ॥ ૧૩॥

પ્રભવે ચાપરાર્ધસ્ય પરાર્ધપ્રભવે નમઃ ।
નમઃ પુરાણપ્રભવે સર્ગાણાં પ્રભવે નમઃ ॥ ૧૪॥

મન્વન્તરાણાં પ્રભવે યોગસ્ય પ્રભવે નમઃ ।
ચતુર્વિધસ્ય સર્ગસ્ય પ્રભવેઽનન્તચક્ષુષે ॥ ૧૫॥

કલ્પોદયનિબન્ધાનાં વાર્તાનાં પ્રભવે નમઃ ।
નમો વિશ્વસ્ય પ્રભવે બ્રહ્માધિપતયે નમઃ ॥ ૧૬॥

વિદ્યાનાં પ્રભવે ચૈવ વિદ્યાધિપતયે નમઃ ।
નમો વ્રતાધિપતયે વ્રતાનાં પ્રભવે નમઃ ॥ ૧૭॥

મન્ત્રાણાં પ્રભવે તુભ્યં મન્ત્રાધિપતયે નમઃ ।
પિતૄણાં પતયે ચૈવ પશૂનાં પતયે નમઃ ॥ ૧૮॥

વાગ્વૃષાય નમસ્તુભ્યં પુરાણવૃષભાય ચ ।
નમઃ પશૂનાં પતયે ગોવૃષેન્દ્રધ્વજાય ચ ॥ ૧૯॥

પ્રજાપતીનાં પતયે સિદ્ધીનાં પતયે નમઃ ।
દૈત્યદાનવસઙ્ઘાનાં રક્ષસાં પતયે નમઃ ॥ ૨૦॥

ગન્ધર્વાણાં ચ પતયે યક્ષાણાં પતયે નમઃ ।
ગરુડોરગસર્પાણાં પક્ષિણાં પતયે નમઃ ॥ ૨૧॥

સર્વગુહ્યપિશાચાનાં ગુહ્યાધિપતયે નમઃ ।
ગોકર્ણાય ચ ગોપ્ત્રે ચ શઙ્કુકર્ણાય વૈ નમઃ ॥ ૨૨॥

વરાહાયાપ્રમેયાય ઋક્ષાય વિરજાય ચ ।
નમો સુરાણાં પતયે ગણાનાં પતયે નમઃ ॥ ૨૩॥

અમ્ભસાં પતયે ચૈવ ઓજસાં પતયે નમઃ ।
નમોઽસ્તુ લક્ષ્મીપતયે શ્રીપાય ક્ષિતિપાય ચ ॥ ૨૪॥

બલાબલસમૂહાય અક્ષોભ્યક્ષોભણાય ચ ।
દીપ્તશૃઙ્ગૈકશૃઙ્ગાય વૃષભાય કકુદ્મિને ॥ ૨૫॥

નમઃ સ્થૈર્યાય વપુષે તેજસાનુવ્રતાય ચ ।
અતીતાય ભવિષ્યાય વર્તમાનાય વૈ નમઃ ॥ ૨૬॥

સુવર્ચસે ચ વીર્યાય શૂરાય હ્યજિતાય ચ ।
વરદાય વરેણ્યાય પુરુષાય મહાત્મને ॥ ૨૭॥

નમો ભૂતાય ભવ્યાય મહતે પ્રભવાય ચ ।
જનાય ચ નમસ્તુભ્યં તપસે વરદાય ચ ॥ ૨૮॥

અણવે મહતે ચૈવ નમઃ સર્વગતાય ચ ।
નમો બન્ધાય મોક્ષાય સ્વર્ગાય નરકાય ચ ॥ ૨૯॥

નમો ભવાય દેવાય ઇજ્યાય યાજકાય ચ ।
પ્રત્યુદીર્ણાય દીપ્તાય તત્ત્વાયાતિગુણાય ચ ॥ ૩૦॥

નમઃ પાશાય શસ્ત્રાય નમસ્ત્વાભરણાય ચ ।
હુતાય ઉપહૂતાય પ્રહુતપ્રાશિતાય ચ ॥ ૩૧॥

નમોઽસ્ત્વિષ્ટાય પૂર્તાય અગ્નિષ્ટોમદ્વિજાય ચ ।
સદસ્યાય નમશ્ચૈવ દક્ષિણાવભૃથાય ચ ॥ ૩૨॥

અહિંસાયાપ્રલોભાય પશુમન્ત્રૌષધાય ચ ।
નમઃ પુષ્ટિપ્રદાનાય સુશીલાય સુશીલિને ॥ ૩૩॥

અતીતાય ભવિષ્યાય વર્તમાનાય તે નમઃ ।
સુવર્ચસે ચ વીર્યાય શૂરાય હ્યજિતાય ચ ॥ ૩૪॥

વરદાય વરેણ્યાય પુરુષાય મહાત્મને ।
નમો ભૂતાય ભવ્યાય મહતે ચાભયાય ચ ॥ ૩૫॥

જરાસિદ્ધ નમસ્તુભ્યમયસે વરદાય ચ ।
અધરે મહતે ચૈવ નમઃ સસ્તુપતાય ચ ॥ ૩૬॥

નમશ્ચેન્દ્રિયપત્રાણાં લેલિહાનાય સ્રગ્વિણે ।
વિશ્વાય વિશ્વરૂપાય વિશ્વતઃ શિરસે નમઃ ॥ ૩૭॥

સર્વતઃ પાણિપાદાય રુદ્રાયાપ્રતિમાય ચ ।

નમો હવ્યાય કવ્યાય હવ્યવાહાય વૈ નમઃ ॥ ૩૮॥

નમઃ સિધ્દ્ધાય મેધ્યાય ઇષ્ટાયેજ્યાપરાય ચ ।
સુવીરાય સુઘોરાય અક્ષોભ્યક્ષોભણાય ચ ॥ ૩૯॥

સુપ્રજાય સુમેધાય દીપ્તાય ભાસ્કરાય ચ ।
નમો બુધ્દ્ધાય શુધ્દ્ધાય વિસ્તૃતાય મતાય ચ ॥ ૪૦॥

નમઃ સ્થૂલાય સૂક્ષ્માય દૃશ્યાદૃશ્યાય સર્વશઃ ।
વર્ષતે જ્વલતે ચૈવ વાયવે શિશિરાય ચ ॥ ૪૧॥

નમસ્તે વક્રકેશાય ઊરુવક્ષઃશિખાય ચ ।
નમો નમઃ સુવર્ણાય તપનીયનિભાય ચ ॥ ૪૨॥

વિરૂપાક્ષાય લિઙ્ગાય પિઙ્ગલાય મહૌજસે ।
વૃષ્ટિઘ્નાય નમશ્ચૈવ નમઃ સૌમ્યેક્ષણાય ચ ॥ ૪૩॥

નમો ધૂમ્રાય શ્વેતાય કૃષ્ણાય લોહિતાય ચ ।
પિશિતાય પિશઙ્ગાય પીતાય ચ નિષઙ્ગિણે ॥ ૪૪॥

નમસ્તે સવિશેષાય નિર્વિશેષાય વૈ નમઃ ।
નમ ઈજ્યાય પૂજ્યાય ઉપજીવ્યાય વૈ નમઃ ॥ ૪૫॥

નમઃ ક્ષેમ્યાય વૃધ્દ્ધાય વત્સલાય નમોનમઃ ।
નમો ભૂતાય સત્યાય સત્યાસત્યાય વૈ નમઃ ॥ ૪૬॥

નમો વૈ પદ્મવર્ણાય મૃત્યુઘ્નાય ચ મૃત્યવે ।
નમો ગૌરાય શ્યામાય કદ્રવે લોહિતાય ચ ॥ ૪૭॥

મહાસન્ધ્યાભ્રવર્ણાય ચારુદીપ્તાય દીક્ષિણે ।
નમઃ કમલહસ્તાય દિગ્વાસાય કપર્દિને ॥ ૪૮॥

અપ્રમાણાય સર્વાય અવ્યયાયામરાય ચ ।
નમો રૂપાય ગન્ધાય શાશ્વતાયાક્ષતાય ચ ॥ ૪૯॥

પુરસ્તાદ્બૃંહતે ચૈવ વિભ્રાન્તાય કૃતાય ચ ।
દુર્ગમાય મહેશાય ક્રોધાય કપિલાય ચ ॥ ૫૦॥

તર્ક્યાતર્ક્યશરીરાય બલિને રંહસાય ચ ।
સિકત્યાય પ્રવાહ્યાય સ્થિતાય પ્રસૃતાય ચ ॥ ૫૧॥

સુમેધસે કુલાલાય નમસ્તે શશિખણ્ડિને ।
ચિત્રાય ચિત્રવેષાય ચિત્રવર્ણાય મેધસે ॥ ૫૨॥

ચેકિતાનાય તુષ્ટાય નમસ્તે નિહિતાય ચ ।
નમઃ ક્ષાન્તાય દાન્તાય વજ્રસંહનનાય ચ ॥ ૫૩॥

રક્ષોઘ્નાય વિષઘ્નાય શિતિકણ્ઠોર્ધ્વમન્યવે ॥

લેલિહાય કૃતાન્તાય તિગ્માયુધધરાય ચ ॥ ૫૪॥

પ્રમોદાય સમ્મોદાય યતિવેદ્યાય તે નમઃ ।
અનામયાય સર્વાય મહાકાલાય વૈ નમઃ ॥ ૫૫॥

પ્રણવપ્રણવેશાય ભગનેત્રાન્તકાય ચ ।
મૃગવ્યાધાય દક્ષાય દક્ષયજ્ઞાન્તકાય ચ ॥ ૫૬॥

સર્વભૂતાત્મભૂતાય સર્વેશાતિશયાય ચ ।
પુરઘ્નાય સુશસ્ત્રાય ધન્વિનેઽથ પરશ્વધે ॥ ૫૭॥

પૂષદન્તવિનાશાય ભગનેત્રાન્તકાય ચ ।
કામદાય વરિષ્ઠાય કામાઙ્ગદહનાય ચ ॥ ૫૮॥

રઙ્ગે કરાલવક્રાય નાગેન્દ્રવદનાય ચ ।
દૈત્યાનામન્તકેશાય દૈત્યાક્રન્દકરાય ચ ॥ ૫૯॥

હિમઘ્નાય ચ તીક્ષ્ણાય આર્દ્રચર્મધરાય ચ ।
શ્મશાનરતિનિત્યાય નમોઽસ્તૂલ્મુકધારિણે ॥ ૬૦॥

નમસ્તે પ્રાણપાલાય મુણ્ડમાલાધરાય ચ ।
પ્રહીણશોકૈર્વિવિધૈર્ભૂતૈઃ પરિવૃતાય ચ ॥ ૬૧॥

નરનારીશરીરાય દેવ્યાઃ પ્રિયકરાય ચ ।
જટિને મુણ્ડિને ચૈવ વ્યાલયજ્ઞોપવીતિને ॥ ૬૨॥

નમોઽસ્તુ નૃત્યશીલાય ઉપનૃત્યપ્રિયાય ચ ।
મન્યવે ગીતશીલાય મુનિભિર્ગાયતે નમઃ ॥ ૬૩॥

કટઙ્કટાય તિગ્માય અપ્રિયાય પ્રિયાય ચ ।
વિભીષણાય ભીષ્માય ભગપ્રમથનાય ચ ॥ ૬૪॥

સિદ્ધસઙ્ઘાનુગીતાય મહાભાગાય વૈ નમઃ ।

નમો મુક્તાટ્ટહાસાય ક્ષ્વેડિતાસ્ફોટિતાય ચ ॥ ૬૫॥

નર્દતે કૂર્દતે ચૈવ નમઃ પ્રમુદિતાત્મને ।
નમો મૃડાય શ્વસતે ધાવતેઽધિષ્ઠિતે નમઃ ॥ ૬૬॥

ધ્યાયતે જૃમ્ભતે ચૈવ રુદતે દ્રવતે નમઃ ।
વલ્ગતે ક્રીડતે ચૈવ લમ્બોદરશરીરિણે ॥ ૬૭॥

નમોઽકૃત્યાય કૃત્યાય મુણ્ડાય કીકટાય ચ ।
નમ ઉન્મત્તદેહાય કિઙ્કિણીકાય વૈ નમઃ ॥ ૬૮॥

નમો વિકૃતવેષાય ક્રૂરાયામર્ષણાય ચ ।
અપ્રમેયાય ગોપ્ત્રે ચ દીપ્તાયાનિર્ગુણાય ચ ॥ ૬૯॥

વામપ્રિયાય વામાય ચૂડામણિધરાય ચ ।
નમસ્તોકાય તનવે ગુણૈરપ્રમિતાય ચ ॥ ૭૦॥

નમો ગુણ્યાય ગુહ્યાય અગમ્યગમનાય ચ ।
લોકધાત્રી ત્વિયં ભૂમિઃ પાદૌ સજ્જનસેવિતૌ ॥ ૭૧॥

સર્વેષાં સિદ્ધિયોગાનામધિષ્ઠાનં તવોદરમ્ ।
મધ્યેઽન્તરિક્ષં વિસ્તીર્ણં તારાગણવિભૂષિતમ્ ॥ ૭૨॥

સ્વાતેઃ પથ ઇવાભાતિ શ્રીમાન્ હારસ્તવોરસિ ।
દિશો દશભુજાસ્તુભ્યં કેયૂરાઙ્ગદભૂષિતાઃ ॥ ૭૩॥

વિસ્તીર્ણપરિણાહશ્ચ નીલાઞ્જનચયોપમઃ ।
કણ્ઠસ્તે શોભતે શ્રીમાન્ હેમસૂત્રવિભૂષિતઃ ॥ ૭૪॥

દંષ્ટ્રાકરાલં દુર્ધર્ષમનૌપમ્યં મુખં તથા ।
પદ્મમાલાકૃતોષ્ણીષં શિરો દ્યૌઃ શોભતેઽધિકમ્ ॥ ૭૫॥

દીપ્તિઃ સૂર્યે વપુશ્ચન્દ્રે સ્થૈર્યં શૈલેઽનિલે બલમ્ ।
ઔષ્ણ્યમગ્નૌ તથા શૈત્યમપ્સુ શબ્દોઽમ્બરે તથા ॥ ૭૬॥

અક્ષરાન્તરનિષ્પન્દાદ્ગુણાનેતાન્વિદુર્બુધાઃ ।
જપો જપ્યો મહાદેવો મહાયોગો મહેશ્વરઃ ॥ ૭૭॥

પુરેશયો ગુહાવાસી ખેચરો રજનીચરઃ ।
તપોનિધિર્ગુહગુરુર્નન્દનો નન્દવર્ધનઃ ॥ ૭૮॥

હયશીર્ષા પયોધાતા વિધાતા ભૂતભાવનઃ ।
બોદ્ધવ્યો બોધિતા નેતા દુર્ધર્ષો દુષ્પ્રકમ્પનઃ ॥ ૭૯ ॥

બૃહદ્રથો ભીમકર્મા બૃહત્કીર્તિર્ધનઞ્જયઃ ।
ઘણ્ટાપ્રિયો ધ્વજી છત્રી પિનાકી ધ્વજિનીપતિઃ ॥ ૮૦ ॥

કવચી પાટ્ટિશી ખડ્ગી ધનુર્હસ્તઃ પરમશ્વધી ।
અઘસ્મરોઽનઘઃ શૂરો દેવરાજોઽરિમર્દનઃ ॥ ૮૧ ॥

ત્વાં પ્રસાદ્ય પુરાસ્માભિર્દ્વિષન્તો નિહતા યુધિ ।
અગ્નિઃ સદાર્ણવાનમ્ભસ્ત્વં પિબન્નપિ ન તૃપ્યસે ॥ ૮૨ ॥

ક્રોધાકારઃ પ્રસન્નાત્મા કામદઃ કામગઃ પ્રિયઃ ।
બ્રહ્મચારી ચાગાધશ્ચ બ્રહ્મણ્યઃ શિષ્ટપૂજિતઃ ॥ ૮૩ ॥

દેવાનામક્ષયઃ કોશસ્ત્વયા યજ્ઞઃ પ્રકલ્પિતઃ ।
હવ્યં તવેદં વહતિ વેદોક્તં હવ્યવાહનઃ ।
પ્રીતે ત્વયિ મહાદેવ વયં પ્રીતા ભવામહે ॥ ૮૪ ॥

ભવાનીશોઽનાદિમાંસ્ત્વં ચ સર્વલોકાનાં ત્વં બ્રહ્મકર્તાદિસર્ગઃ ।
સાઙ્ખ્યાઃ પ્રકૃતેઃ પરમં ત્વાં વિદિત્વા ક્ષીણધ્યાનાસ્ત્વામમૃત્યું વિશન્તિ ॥ ૮૫ ॥

યોગાશ્ચ ત્વાં ધ્યાયિનો નિત્યસિદ્ધં જ્ઞાત્વા યોગાન્ સન્ત્યજન્તે પુનસ્તાન્ ।
યે ચાપ્યન્યે ત્વાં પ્રસન્ના વિશુદ્ધાઃ સ્વકર્મભિસ્તે દિવ્યભોગા ભવન્તિ ॥ ૮૬ ॥

અપ્રસઙ્ખ્યેયતત્ત્વસ્ય યથા વિદ્મઃ સ્વશક્તિતઃ ।
કીર્તિતં તવ માહાત્મ્યમપારસ્ય મહાત્મનઃ ॥ ૮૭ ॥

શિવો નો ભવ સર્વત્ર યોઽસિ સોઽસિ નમોઽસ્તુ તે ।
સૂત ઉવાછ ।
ય ઇદં કીર્તયેદ્ભક્ત્યા બ્રહ્મનારાયણસ્તવમ્ ॥ ૮૮ ॥

શ્રાવયેદ્વા દ્વિજાન્ વિધ્વાન્ શ઼ૃણુયાદ્વા સમાહિતઃ ।
અધ્વમેધાયુતં કૃત્વા યત્ફલં તદવાપ્નુયાત્ ॥ ૮૯ ॥

પાપાચારોઽપિ યો મર્ત્યઃ શ઼ૃણુયાચ્છિવસન્નિધૌ ।
જપેદ્વાપિ વિનિર્મુક્તો બ્રહ્મલોકં સ ગચ્છતિ ॥ ૯૦ ॥

શ્રાદ્ધે વા દૈવિકે કાર્યે યજ્ઞે વાવભૃથાન્તિકે ।
કીર્તયેદ્વા સતાં મધ્યે સ યાતિ બ્રહ્મણોઽન્તિકમ્ ॥ ૯૧ ॥

ઇતિ શ્રીલિઙ્ગમહાપુરાણે પૂર્વભાગે બ્રહ્મવિષ્ણુસ્તુતિર્નામૈકવિંશોઽધ્યાયાન્તર્ગતા
શ્રીવિષ્ણુકૃતા મહેશ્વરસ્તુતિઃ સમ્પૂર્ણા ।

॥ લિઙ્ગપુરાણં ॥ પૂર્વભાગઃ । અધ્યાયઃ ૨૧। ૨-૯૧॥

Encoded and proofread by Ruma Dewan

---

*Maheshvara Stutih*
pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*